कानपुरनिवासी गुजराती श्रावको तरफथी भेट.

जै० का० १०

अर्हम्

# महेन्द्रस्वर्गारोहः ।

शास्त्रविशारदजैनाचार्यश्रीविजयधर्मसूरिचर-
णान्तेवासिना न्यायतीर्थ-न्यायविशारद-
मुनिन्यायविजयेन विरचितः ।

स च

वाराणस्यां

श्रेष्ठिभूराभार्हतनुजहर्षचन्द्रेण निजधर्माभ्युदययन्त्रालये
मुद्रयित्वा प्रकाशितः ।

वीरसंवत् २४३८ ।

Printed and Published by Shah Harakhchand Bhurabhai,
at the Dharmabhyudaya Press Benares City.

। अर्हम् ।

## मुनिराजश्रीमहेन्द्रविजयजी.



जन्म, सं- १९४३. स्वर्ग, सं- १९६८.

अहो ! पण्डितराजोऽयं महेन्द्रविजयो मुनिः ।
दृश्यतां धर्मसूरीन्द्रशिष्यरूपो महातपाः ॥ १ ॥

अर्हम् ।

श्रीविजयधर्मसूरिगुरुभ्यो नमः ।

# महेन्द्रस्वर्गारोहः ।

जैनेन्द्रशासनरतः परमः कृपालुः
स्वल्पं वचः समुचितं मधुरं प्रणेता ।
सन्तोषपोषजनकः स्वमुखप्रसादात्
स श्रीमहेन्द्रविजयः स्वरगान्महात्मा ॥ १ ॥

नैपुण्यमाकलितवान् किल शाब्दशास्त्रे
साहित्यशास्त्रविनिविष्टमतिप्रकर्षः ।
अध्यापनां रचयिता मधुरं बहूनां
स श्रीमहेन्द्रविजयः स्वरगान्महात्मा ॥ २ ॥

पार्षद्यमानसपयोरुहभानुभानु-
व्याख्यानमारचयिता परिपूर्णतत्त्वम् ।
नेता दयादिकगुणैकपदीं ततश्च
स श्रीमहेन्द्रविजयः स्वरगान्महात्मा ॥ ३ ॥

चारित्रगात्रजननीः परिपालयित्री-
रेतस्य शोधनकरीः समितीश्च गुप्तीः ।
संसेविता प्रवचनस्य सदाष्टमातॄः
स श्रीमहेन्द्रविजयः स्वरगान्महात्मा ॥ ४ ॥

भक्तिप्रियः प्रतिदिनं गुरुदेवतासु

क्लिष्टे तपश्चरणवर्त्मनि सञ्चरिष्णुः ।
एवंविधोऽप्युपहतो न कषायचौरैः
स श्रीमहेन्द्रविजयः स्वरगान्महात्मा ॥ ५ ॥
क्रोधो हि योजनशतं किल दूरमासीत्
तस्माच्छमैकसुहृदं परिषेवमाणात् ।
नो जातु नाम मनसा वचसाऽङ्गतश्चा-
ऽवष्टम्भलेशमपि दर्शयिता बभूव ॥ ६ ॥
आक्रोशितोऽप्यतितरां कटुजल्पधारया
कुर्याद् रुषं तु कथमेष मुनिर्महेश्वरः ।
किन्तु प्रभूतपरितोषसुधाभिपूरितै-
राक्रोशमानयत शान्तिपथे गवां गणैः ॥ ७ ॥
सत्यं समस्य पुरतः परिघोषयामः
शत्रुस्वभावपतितेऽपि हि नम्रतोच्चैः ।
एकः क्षमाश्रमणतां क्षमितागुणोऽस्य
श्रीलस्य तत्रभवतः प्रकटीचकार ॥ ८ ॥
दम्भस्य तु प्रणयने न कदाप्यमुष्य
प्राप्तः प्रसङ्ग उपघातितसंयमस्य ।
स्वाध्यायमेव हि सदा विजने स्थलेऽसौ
धीमान् समाद्रियत बाह्यविरक्तचेताः ॥ ९ ॥
संबिभ्रतोऽस्य शरणं परितोषराजो
नित्यं विवेकसदलङ्कृतिमण्डितस्य ।
सम्यक्परिग्रहयमाऽऽत्मरमागृहीतौ

लोभस्य शौर्यमुदभूद् नहि तस्करस्य ॥ १० ॥

एकाशनव्रतमहो ! सततं वितन्वन्
भुङ्क्ते स्म भोजनमसौ समयोपलब्धम् ।
स्वादिष्ठवस्तुनि मनागपि निर्मिमाणो
गाद्ध्‍र्यं कदाऽपि न पुनः परिदृश्यते स्म ॥११॥

नव्यं च वस्त्रमसकौ न कदाऽपि दध्रे
ग्रन्थान् पुनः समुचितान् प्रशमानुकूलान् ।
एकोऽहमस्मि मम कोऽपि न नास्मि चाहं
कस्याप्यदीनमनसेति सदापि दध्यौ ॥ १२ ॥

निष्टङ्कनेऽसति सति स्वकभारतीं न
प्रायः समादित जिनेन्द्रवचोऽनुरक्तः ।
संशीतिगोचरपदे तु महानुभावः
संशीतिशब्दमपि सार्धमनूच्चचार ॥ १३ ॥

माधूर्यपूरितमबाधितमप्यतुच्छं
संप्रोचुषोऽत्रभवतः श्रमणेश्वरस्य ।
क्व स्याद् मृषावचनदूषणसंप्रवेशः
संभावना त्वददितग्रहणे कुतस्त्या ? ॥ १४ ॥

भिक्षार्थमार्हतमुखाम्बुजदर्शनार्थं
नीहारकर्मकृतयेऽप्यथवा प्रयातः ।
मेधाविनः शमसुधारसमेदुरस्य
क्वापि स्त्रियां न नयनं निपपात तस्य ॥१५॥

पञ्च व्रतान्यपि महान्त्यभिरक्षतः सत्-

कालानुभावमनुसृत्य मुनीश्वरस्य ।
धैर्यं परीषहचमूसहने महिष्ठं
संबिभ्रतः परमसत्त्वगुणालयस्य ॥ १६ ॥
गाम्भीर्यमद्भुतमुपेतवतः समस्त-
कर्मक्षयात्मशिवसम्पदऽवेप्सयैव ।
सम्यक् क्रियां विदधतो गुरुवाक्य आस्ते
धर्मश्चकासदिति धारयतश्च चित्ते ॥ १७ ॥
स्वच्छप्रसादकिरणाततहर्षवर्षो
वक्त्रेन्दुरक्षिपदवीविनिपातमात्रात् ।
पापं क्षिणोति चिनुते च शरीरभाजां
श्रेयः पिपर्त्यभिमतं च किमत्र वाच्यम् ? ॥१८॥
( त्रिभिर्विशेषकम् )
किं ब्रूमहे बहु महोदयसम्पदास्पदे-
ऽस्मिन् ज्ञानदर्शनतपोविशदात्मशालिनि ! ।
एकप्रसादगुणतः खलु विस्मयामहे
दृष्टो भविष्यति कदा स मुनिर्महेश्वरः ॥ १९ ॥
क्रोधाग्निदग्धमनसः प्रशमार्पणाकृते
नास्य प्रमोदजलधेर्वचसः प्रयोजनम् ।
एकं प्रसादसुधया परिधौतमक्ष्यलं
दृष्टो भविष्यति कदा स मुनिर्महेश्वरः ॥ २० ॥
तस्य प्रसादविमलं नयनं त्रिलोक्या-
ऽरातिस्वभावपतितोऽपि भृशं तुतोष ।

तद्दर्पसर्पपरिपन्थिगुणप्रसादं
बिभ्रत् कदा स परिपावयिता महेन्द्रः ॥ २१ ॥

सम्भावनामपि न कुर्म इमां कदाऽपि
यन्नाम तं मुनिवरं परिचिन्वतोऽत्र ।
संपश्यतोऽपि खलु दुर्जनदृष्टिरूपाद्
दोषो विलोचनपथेऽवततार तत्र ॥ २२ ॥

किं कुर्महे तनुमहे गमनं क्व वा वयं
कं वा भुवीह पुरुषेश्वरमाश्रयामहे ।
कस्याग्र आपदमिमां परिदर्शयामहे
प्राप्येत येन पुनरेष मुनिर्महेश्वरः ? ॥ २३ ॥

भो भोः ! प्रदर्शयत तादृशमुच्चमन्त्रं
यज्जापतः सुमनसा सहसा नयामः ।
श्रीमन्महेश्वरमहोदयशारदेन्दु-
नीहारहारधवलाननमक्षिमार्गम् ॥ २४ ॥

तस्मिन् गते मुनिपतौ महनीयकीर्त्ता-
वस्माकमाकलयतां विषयानुरागम् ।
साधूपदिश्य हृदयं गतगार्द्ध्यपङ्कं
कुर्याच्चिरं रहसि को मधुरैर्वचोभिः ? ॥ २५ ॥

लोकेऽत्र किं स परिभावितवान् महेन्द्रो
नैर्गुण्यमाशु परिहाय यतो जगाम ।
अत्र प्रयाम्यहकमित्यपि यन्न चोचे
कस्माद् गतोऽपि पुनरेष्यति वा नवाऽथ ? ॥२६॥

धीमन् ! तवाऽद्भुतनतिर्मनसो न याति
धीमन् ! तवाऽद्भुतमतिर्मनसो न याति ।
धीमन् ! त्वदीयमुदितं मनसो न याति
धीमन् ! त्वदीयगमनं मनसो न याति ॥ २७ ॥
किं नाम कर्म परिसाधयितुं समीहसे
यत्सत्त्वरं प्रगतवाननिवेद्य सुन्दर ! ।
अप्यस्मदा चरितुमिच्छसि गुप्तरूपतो
याद्दङ्मतिर्वद परश्च कदा मिलिष्यसि ? ॥ २८ ॥
स्पष्टं निवेदय महेन्द्र ! महानुभाव !
कुत्र प्रयाणमकृथाश्च किमर्थकं च ? ।
अन्वेषणाय सहसा गुणरत्नसिन्धो !
श्रीलस्य तत्रभवतः प्रयतामहे यत् ॥ २९ ॥
पूर्णः शशाङ्क उदितश्च तमोगृहीतो
जातस्तरुश्च फलदः करिणा च भग्नः ।
अभ्युन्नतश्च जलदः पवनाद् विकीर्णः
तीरं तरी गतवती च तटाद्रिभग्ना ॥ ३० ॥
निष्पन्नवद् व्रीहिवणं दवाग्निना
दग्धं हहा ! दैववशेन सत्वरम् ।
वैदुष्यचारित्रगुणैकसुन्दरी-
भूतो महेन्द्रो यमरक्षसा हतः ॥ ३१ ॥
( युग्मम् )
नाऽस्मन्मनस्तिष्ठति सुस्थभावे

नाऽस्मन्मनस्तिष्ठति सद्विवेके ।
नाऽस्मन्मनस्तिष्ठति शास्त्ररूपे
गीर्वाणगेहं गतवत्यमुष्मिन् ॥ ३२ ॥
कुक्षे ! कथं मुञ्चसि मां न हि स्वयं
प्राणाः ! किमद्यापि न याथ दूरतः ।
सुदुःसहेदृग्व्यसनाऽपरिक्षम !
त्वमङ्ग ! किं तद्वपुषा न सङ्गतम् ? ॥ ३३ ॥
अथवा मोहचिह्नोऽयं शोको युक्तो न धीमताम् ।
सर्वे हि गत्वरा नाम कुत्र शोकः प्रणीयते ? ॥३४॥
नीयमानं कृतान्तेन परं शोचन् विमुग्धधीः ।
आत्मानं नेष्यमाणं तु मनागपि न शोचति ॥३५॥
किञ्च सार्थक्यमानीय नृजन्माऽयं मुनीश्वरः ।
अभ्युन्नतिं प्रपेदानोऽचिरादस्ति मुदां पदम् ॥३६॥
सम्यग् मुनिचरित्राणां पालकस्य मुनीशितुः ।
कालधर्मः समायात उत्सवः सम्मतः सताम् ॥३७॥
किमन्यद् ब्रूमहे तत्र मुनिरत्नशिरोमणौ ।
चित्रकृच्चरितं तस्य श्रूयमाणं मनागपि ॥ ३८ ॥
तथाहि—
अस्तीह सिद्धगिरिणा परिदीप्यमानः
श्रीगूर्जरा जनपदो विदितस्वरूपः ।
श्रीमाण्डलं च निकषाऽभिधया दसाडा-
ग्रामोऽस्ति तत्र जिनमन्दिरमण्डनाढ्यः ॥३९॥

सम्यग्यशा इह च सांकलचन्द्रनामा
श्रद्धागुणाऽमलमना विकसद्विवेकः ।
तत्स्थैर्जनैर्नगरशेठ इति प्रणीतो
न्यायाऽनुपालनपरो वणिगेक आसीत् ॥ ४० ॥
आसीदमुष्य शुचिशीलगुणा झवेरी-
त्याख्याङ्गना व्रततपोनियमानुरक्ता ।
कालक्रमेण तनयः परिजायते स्म
कल्याणपात्रमनयोः सुकृतोदयेन ॥ ४१ ॥
स्ववर्गे मिलिते साधुदिवसे पितरावथ ।
सूनोर्नाम मफालाल इत्यस्थापयतां मुदा ॥ ४२ ॥
अथ क्रमाद् बालक एधमान-
श्चक्षुर्युगानन्दकरो बभूव ।
पित्रोः परं नापरपश्यतोऽपि
नाऽऽनन्दयत्यम्बुधिमेव हीन्दुः ॥ ४३ ॥
नियुज्य भूमौ निजपाणियामलं
पृष्ठं मृगारातिरिवोन्नमय्य च ।
कुर्वन् क्रमाभ्यां गमनं शनैः शनै-
र्मुखाब्जिनीतः प्रथयन् स्मिताम्बुजम् ॥ ४४ ॥
असौ किमीयं मुदितं न बालको
मनश्चकारेन्दुविकासिभूघनः ।
सुकोमलस्तस्य च पाणिपल्लवः
संस्पृष्टमात्रो मुदमार्पिपत् पराम् ॥ ४५ ॥

वृत्तं तदास्यं मसृणं निसर्गतः
शोचिःसमूहं प्रथयत् समन्ततः ।
दृष्ट्वा निशारत्नसहोदरं न कः
स्वाऽङ्के न्यधित्सद् रमणाय तं मुदः ? ॥ ४६ ॥

जातेऽथ वर्षदशके कुमरस्य तस्या-
युःपूरणे दिवमगाज्जनकस्ततोऽम्बा ।
कीदृग् विधेर्विलसितं जगदङ्गिवर्गे
क्रीडां यथेच्छमपनीतदयः करोति ? ॥ ४७ ॥

गत्वा ततो मातुलगेहरूपे
तस्थौ स वर्षत्रितयं यथेष्टम् ।
ततः पुनर्माण्डलपत्तनेऽस्थाद्
मातुःस्वसुः सद्मनि सप्रमोदम् ॥ ४८ ॥

पितुःस्वसुश्चाऽपि गृहेऽथ तत्र
तिष्ठन् निराबाधमसावपाठीत् ।
को नाम रत्नं शुभवृद्धिहेतुं
गृहे स्वकीये परिरक्षयेन्न ? ॥ ४९ ॥

अध्येतुमिच्छुस्तत आङ्ग्लभाषां
जगाम धीमान् सवयस्सनाथः ।
साऽऽमोदचेताः सुरते पुरेऽसौ
धीरा विधेये न किलाऽऽलसन्ति ॥ ५० ॥

ततः पुनः संस्कृतभारतीं स
महामतिः संपरिचेतुमिच्छुः ।

काश्यां पुरि श्रीयुतधर्मसूरि-
पादैः सहैति स्म विहृत्य पद्भ्याम् ॥ ५१ ॥
सारस्वतं व्याकरणं पपाठा-
ऽऽरम्भे ततोऽसौ लघुवृत्ति हैमम् ।
गीर्वाणवाणीनिपुणीबभूवान्
काव्यादिभिः कस्य मुदे स नाऽऽसीत् ॥ ? ५२ ॥
अथ क्रमादाप स यौवनश्रियं
नृलोचनद्वन्द्वचकोरचन्द्रिकाम् !
सुनिर्मलं कान्तितरङ्गि वर्तुलं
बभौ तदास्यं रजनीकरः परः ॥ ५३ ॥
अहो ! अहोरात्रसमुन्नतोदयां
शङ्के समालोक्य तदाननश्रियम ।
चमत्कृतश्चेतसि लोलुपस्तदा-
ऽऽपाने विरञ्चिश्चतुराननोऽजनि ॥ ५४ ॥
दन्ता बभुः कुन्दसुमेन्दुसुन्दरा
द्युतां वितानैर्ननु रज्जुसन्निभैः ।
संसारकूपे निपतच्छरीरिणा-
मुद्धारणायां किमहो ! समुन्मुखाः ॥ ५५ ॥
मुखे च लावण्यसरःसरोवरे
मीनौ व संरेजतुरस्य लोचने ।
आकर्णदीर्घे पुनरन्तलोहिते
तथाऽन्तराकृष्णसिते समुज्ज्वले ॥ ५६ ॥

स्निग्धौ कपोलफलकौ विमलौ च मांसलौ
वाणी-श्रियोर्वे मुकुरौ ददतुः परां मुदम् ।
ओष्ठौ च तस्य परिपाकिम-बिम्बसन्निभौ
वक्त्रप्रभाजलनिधौ बभतुः प्रवालवत् ॥ ५७ ॥

लोला तदीया च यथार्थवस्तु-
व्याकारदाक्षीं दधती दिदीपे ।
मन्ये प्रसर्पद्दशनांशुरज्जु-
नियन्त्रिता वाग्रमणैकदोला ॥ ५८ ॥

सदान्तरावर्तमनोज्ञरूपा-
वास्कन्धदीर्घौ कुमरस्य तस्य ।
मुखप्रभावारिनिधिप्रतीरे
शुक्ती व कर्णौ परिदिद्युताते ॥ ५९ ॥

भ्रुवावभातां कुटिले च मेचके
लते व दृक्पुष्करिणीतटोद्भवे ।
नासाप्रदीपेन कृतेन वा श्रियो-
द्गीर्णा मुखे वेश्मनि कज्जलावलिः ॥ ६० ॥

वृत्तं विशालं शरदष्टमीसुधा-
करानुकार्यस्य च भालमस्फुरत् ।
वृत्तः प्रसर्पत्किरणो विशेषक-
स्तद्भालदेवाध्वनि भानुवद् व्यभात् ॥ ६१ ॥

अधोमुखीभूतसदातपत्र-
सब्रह्मचारि प्रतिशिश्रियाणम् ।

विडम्बयन्तं कलशस्य लक्ष्मी-
मुष्णीषमेतस्य बभौ वराङ्गम् ॥ ६२ ॥
मृदुलताकलिताः किल कुन्तला
रविसुताजलवीचिसहोदराः ।
विकचवक्त्रकजे किमु लीननी-
रवषडङ्घ्रय उत्तमसौरभे ॥ ६३ ॥
गम्भीरचारुध्वनिबन्धुरः पुनः
कण्ठोऽस्य वृत्तोऽनतिदीर्घ आबभौ ।
श्रियं यदीयामसहिष्णुरम्बुधौ
निपत्य कम्बुस्त्रपया विशीर्णवान् ॥ ६४ ॥
आजानुदीर्घौ परिदिद्युताते
पीनौ भुजौ दन्तिकरायमाणौ ।
नितान्तसौम्येऽस्य च पाणिचन्द्रे
रेखाऽल्पवर्षायुष एव कार्ष्ण्यम् ॥ ६५ ॥
रम्भास्तम्भप्रतिमौ स्निग्धौ मृदुलावुरू विरेजाते ।
एणीजङ्घानुहरे क्रमवर्तुले पुनर्जङ्घे ॥ ६६ ॥
पादौ तस्य समतलौ पङ्करुहोदरमृदू बभासाते ।
कामाङ्कुशाश्च कामाऽङ्कुशा बभुः कनककान्तिभृतः ॥६७॥
स्वच्छा सुकोमला हेमद्रवेणेव विलेपिता ।
चारुवर्णा शरीरस्था त्वगमुष्य व्यभासत ॥ ६८ ॥
रूपलावण्यकान्त्यादिविवेकप्रतिभादिभिः ।
शरीरात्मगुणै राजन्न कस्याऽभूत् स वल्लभः ?॥ ६९ ॥

इतः पुनर्माण्डलपत्तनात्त-
न्मातुःस्वसुर्नन्दन आजगाम ।
गीर्वाणवाणीनिपुणीबुभूषुः
श्रीकाशिपुर्यां नरसिंहनामा ॥ ७० ॥

सदा नृसिंहस्य सहायभावं
व्यधाद् महाबन्धुरसावधीतौ ।
परोपकारैकपरोत्तमानां
वाच्यं किमात्मीयलघिष्ठबन्धौ ? ॥ ७१ ॥

अथैकदाऽऽयातवति स्ववप्तुः
पत्रे ज्वराद्यामयबोधिवर्णे ।
श्रीधर्मसूरीन्द्रपदं प्रणम्य
ग्रामे स्वकीये गतवान् नृसिंहः ॥ ७२ ॥

मासत्रयाभ्यन्तर एव तस्य
पितुश्च मातुश्च गतौ परत्र ।
हृद्दारणं शोकमनल्पमायन्
स्मरन् भवाम्भोनिधिभीमतां च ॥ ७३ ॥

आगादधीरः परिसोढुमेतद्
दुःखं महिष्ठं सहसा नृसिंहः ।
काश्यां पुनस्तस्य शमाऽर्पणाया-
ऽऽददे मफालाल इमां च वाचम् ॥ ७४ ॥

भ्रातः ! सदा सन्निहितोऽस्ति मृत्युः
संसारवासे वसतां जनानाम् ।

किं सर्वसाधारण आगतेऽस्मिन्
पित्रोर्विषण्णीकुरुषे मनः स्वम् ? ॥ ७५ ॥
सदा परिस्फूर्जति भूत्रयेऽपि
दुर्वारवीर्यप्रसरे कृतान्ते ।
ततो विगूढः किमु कोऽपि दृष्टः
श्रुतोऽथवा येन स वञ्चितः स्यात् ? ॥ ७६ ॥
जनिर्विकारः प्रकृतिश्च मृत्युः
कस्तत्र शोकः प्रकृतौ विधेयः ? ।
भिन्नेन मार्गेण समे समेता
यास्यन्ति भिन्नेन यथा तथैव ॥ ७७ ॥
संबन्धवान् कोऽत्र समस्ति तादृशः
खिन्नीभवामः खलु यद्वियोगतः ।
तथाविधं साधयिताऽपि कोऽत्र नः
स्वार्थं च संबन्धितयोच्यतेऽङ्ग ! यः ॥ ७८ ॥
न वास्तवं कोऽपि ददाति कस्यचिद्
न वास्तवं कोऽपि कुतोऽपि लाति च ।
विना प्रदानं ग्रहणं च वास्तवं
को नाम संबन्धितयाऽभिधीयते ? ॥ ७९ ॥
भवार्णवस्यैष किल स्वभावः
स्थिरं न किञ्चित् शरदभ्रवत्खे ।
अभीप्सिताऽनिष्टवियोगयोगो-
द्भूतार्तिपुञ्जो भवकूप एषः ॥ ८० ॥

त एव धन्या विषयामिषेभ्यः
प्रत्यागतं बुद्धिमतां यकेषाम् ।
सज्ज्ञानसद्दर्शनसद्यमात्म-
रत्नत्रितय्यामनुरागि चेतः ॥ ८१ ॥

भ्रातः ! प्रणीतेऽपि भृशं विषादे
जनः परासुर्न पुनः समेयात् ।
कथं वृथा तत्खलु मोहनीय-
व्याधं समुत्तेजितमातनोषि ? ॥ ८२ ॥

निपुणोऽसि समर्थोऽसि शिक्षितोऽसि विवेक्यसि ।
मा विषीद महाभाग ! दुर्वारा भवितव्यता ॥ ८३ ॥

स्मर च सत्पद्ये—

विपद्युच्चैः स्थेयं पदमनुविधेयं च महतां
प्रिया न्याय्या वृत्तिर्मलिनमसुभङ्गेऽप्यसुकरम् ।
असन्तो नाऽभ्यर्थ्याः सुहृदपि न याच्यस्तनुधनः
सतां केनोद्दिष्टं विषममसिधारा व्रतमिदम् ॥ ८४ ॥

उदेति सविता ताम्रस्ताम्र एवाऽस्तमेति च ।
सम्पत्तौ च विपत्तौ च महतामेकरूपता ॥ ८५ ॥

विवेकदीपं किल धैर्यपात्रे
देदीप्यमानं पुरतो विधाय ।
शोकान्धकारं जहि सत्त्वशालिन् !
स्फारं परिस्फारय पौरुषं स्वम् ॥ ८६ ॥

सद्बोधपीयूषकिरा गिरैवं

प्रबोधनात् शान्तिपथाऽध्वगीसन् ।
संसारनैर्गुण्यमवेक्षमाणो
नृसिंह ऐच्छत् शिवशर्ममार्गम् ॥ ८७ ॥
इतो मफालालमहानुभावः
श्रीधर्मसूरीन्द्रनिदेशमाप्य ।
भावि प्रयाणं न पुनर्मदीय-
मितीव मन्वान इयाय देशे ॥ ८८ ॥
यात्रामकुर्वन् विमलाऽचलस्या-
ऽप्रणीतपूर्वां प्रबलान्तरायात् ।
सम्मेतशैले प्रभुधर्मसूरि-
पदारविन्दे पुनराजगाम ॥ ८९ ॥
ततः सहैभिः कलकत्तिकाया-
मगाद् मफालालमहानुभावः ।
सत्सङ्गतो हि प्रभवत्प्रमोदं
सत्सङ्गभागेव पुमानवैति ॥ ९० ॥
तत्राऽथ पुर्यां मुनिशेखराणां
साधूपदेशाद् भवतो विरागाः ।
त्रये त्वरन्ते स्म महानुभावाः
श्रामण्यसाम्राज्यरमामुपेतुम् ॥ ९१ ॥
ततो मफालालमहानुभावो-
ऽप्येभिस्त्रिभिर्दीक्षितुमभ्यवाञ्छत् ।
निरन्तरायो हि विविक्तबुद्धि-

मज्जेत् कथं भोगपुरीषपुञ्जे ? ॥ ९२ ॥

ततो नृसिंहोऽपि तमन्वगच्छत्

पुरैव संसारविरक्तचेताः ।

स एव बन्धुः स पुनर्वयस्यः

श्रेयःपथेनाऽनुसरेद् निजं यः ॥ ९३ ॥

एवं च ते पञ्च महानुभावाः

सुशिक्षिताश्चारुविवेकभाजः ।

अभूतपूर्वेण महोत्सवेन

तत्रत्यभक्ताढ्यविनिर्मितेन ॥ ९४ ॥

त्रिषष्ट्यभ्यधिके चैकोनविंशतिशताब्दके ।

चैत्राऽधवलपञ्चम्यां दीक्षामाददिरे मुदा ॥ ९५ ॥

( युग्मम् )

सिंहविजय-गुणविजयौ

विद्याविजयो महेन्द्रविजयश्च ।

न्यायविजय इत्याख्याः

पञ्चाऽऽसंस्ते मुनीशितुः शिष्याः ॥ ९६ ॥

महेन्द्रविजयेत्येवं मुनिनाम्ना प्रसिद्धवान् ।

महेच्छः श्रीमफालालो रेमेऽथ शमसम्पदि ॥ ९७ ॥

नरसिंहः पुनर्न्यायविजयेत्यभिधां गतः ।

महेन्द्रविजयाभ्यर्णेऽग्रहीद् वैराग्यशिक्षणम् ॥ ९८ ॥

अथ श्रीकलिकातायां कृत्वा मासचतुष्टयम् ।

ततो विहारं विदधुः सशिष्या धर्मसूरयः ॥ ९९ ॥

काशीपुरीं मुनिवराः समुपागमन् पुन-
र्विद्याऽऽलयं पथमनेषत चोन्नतिश्रियः ।
श्रीमान् महेन्द्रविजयोऽपि कुशाग्रतुल्यधी-
र्विद्याविनोदमकरोद् गुरुभक्तिबन्धुरः ॥१००॥
श्रीसिद्धहेमाभिधशब्दशास्त्र-
प्रासादमारोहत आशु तस्मै ।
शश्लाघिरे विस्मयमाश्रयन्तः
सर्वे सहाध्यायिजना नितान्तम् ॥ १०१ ॥
मुक्तावलीप्रभृतितर्कनिबन्धमादौ
कृत्वा स्वबुद्धिविषयं सततश्रमेण ।
जैनेन्द्रतर्कमधिगन्तुमथो निसर्ग-
गम्भीरमैहत स सम्मतितर्कमुख्यम् ॥ १०२ ॥
न्यायोऽप्यसौ मुनिशिशुः प्रतिपद्य तस्य
साहायकं प्रतिदिनं श्रमतो यथाधि ।
व्युत्पत्तिलेशमधिलक्षणशास्त्रमाप-
ज्जैने पुनस्तदितरत्र च तर्कशास्त्रे ॥ १०३ ॥
गुरोर्गिराथो कलिकातिकायां
श्रीन्यायशास्त्रे ददितुं परीक्षाम् ।
श्रीमङ्गलः प्राज्ञमुनीश्वरश्च
न्यायो मुनिश्च प्रकृतौ विहारम् ॥ १०४ ॥
ताभ्यां तदानीं विनिवेदितः सहा-
गमे यथौचित्यसहायताकरः ।

महामुनिः श्रीलमहेन्द्रपण्डितो-
ऽपरिस्पृशन् लोकयशःपरिस्पृहाम् ॥ १०५ ॥
नम्रस्वभावः परिगृह्य तद्वच-
स्ताभ्यां प्रयाति स्म महेन्द्रपण्डितः ।
परोपकाराय सतां हि चेष्टितं
को वा महेन्द्रं न सहायमीहते ? ॥ १०६ ॥
अष्टषष्ठ्यधिके चैकोनविंशतिशताब्दके ।
मृगशीर्षतृतीयायां धवलायां तिथौ पुनः ॥ १०७ ॥
मध्याह्नसमये चैकवादने मुनयस्त्रयः ।
काशीतो निर्गता आसन् व्यहार्षुश्चाग्रतः क्रमात् १०८
( युग्मम् )
अथ तत्र पथप्राप्तं तीर्थं सम्मेतभूभृतम् ।
आरुह्यार्हन्महादेवान् प्रणेमुर्मुनयो मुदा ॥१०९॥
अर्हद्भक्त्येकरभसः श्रीमहेन्द्रो मुनीश्वरः ।
पार्श्वनाथं जगन्नाथमुच्चकैरेवमस्तवीत् ॥११०॥
अद्य प्रभातं समभूत् सुमङ्गलं
महोदयो वासर एष मे पुनः ।
सौभाग्यसिन्धुर्नियमादयं क्षणो
जातोऽद्य कल्याणतरुः सुपल्लवः ॥ १११ ॥
अभूदहो ! कामगवी च सम्मुखा
शयेशयालुः किल कल्पवल्लरी ।
किमेभिराप्तैरथवानुषङ्गिक-

प्रयोजनैर्जन्मविवृद्धिहेतुभिः ॥ ११२ ॥

प्राप्तो ध्रुवं मुक्तिविवाहमङ्गला-
ऽऽलयो मयाल्पेतरपुण्यढौकितः ।
लोकेऽधुना शारदपूर्णचन्द्रमः-
सहोदरं यन्मुखमेतदर्हतः ॥ ११३ ॥

तुभ्यं देव ! नमोऽर्हते भगवते विश्वत्रयीस्वामिने
सर्वज्ञाय जगद्धिताय पुरुषश्रेष्ठाय भूमानवे ।
लोकोद्द्योतकृतेऽभयं प्रददते स्याद्वादिने ब्रह्मणे
मुक्तायादिकराय तीर्थपतये कारुण्यपाथोधये ११४

निर्यामकाय परमाय भवाम्बुराशौ
रागादिरोगशमकर्मभिषग्वराय ।
संसारकूपनिपतज्जनरज्जवे च
तुभ्यं नमः परमपूरुषपुण्डरीक ! ॥ ११५ ॥

तुभ्यं नमोऽखिलविपत्तिनिकुञ्जदन्तिने
तुभ्यं नमो भुवनवाञ्छितकल्पभूरुहे ।
तुभ्यं नमः स्मरकरीन्द्रभिदामृगाद्विषे
तुभ्यं नमः पुरुषपुङ्गवगन्धहस्तिने ॥ ११६ ॥

नमोऽस्तु तुभ्यं पुरुषोत्तमाय वा
स्वयम्भुवे वा परमेष्ठिनेऽथवा ।
अगम्यरूपाय विशुद्धयोगिनां
नमोऽस्तु तुभ्यं सुगताय शम्भवे ॥ ११७ ॥

पारं स्वयम्भूरमणाम्बुराशेः

सम्प्राप्नुवानो वियदध्वनोऽन्तम् ।
सम्पश्यमानोप्यथवा महौजाः
स्तोतुं किमीशीत गुणांस्तवार्हन् ! ? ॥ ११८ ॥
त्रैलोक्यसाम्राज्यरमानुभाविनो
भवन्ति दासाः खलु यस्य वज्रिणः ।
तथाप्यहो ! अद्भुतवीतरागतां
बिभ्रत् सकस्त्वं नहि कस्य चित्रकृत् ? ॥११९॥
त्रैलोक्यरक्षा-प्रमयक्षमं बलं
शक्राच्च कीटावधि बिभ्रतोऽद्भुतम् ।
साम्यं क्षमावारिनिधेः क्षमेत क-
स्तव स्वरूपं प्रतिपत्तुमेव वा ? ॥ १२० ॥
अभूतां काणादा-ऽक्षचरणमते नैगमनयात्
तथा साङ्ख्याद्वैते समुदभवतां सङ्ग्रहनयात् ।
दृशो बौद्ध्याः प्रादुर्भवनमृजुसूत्रात्प्रकटयन्
किलैकस्त्वं दृष्टिं समसमनयां नन्दसि जिन !॥१२१॥
यन्नाम त्रिजगत्त्रिभेदविपदम्भोराशिकुम्भोद्भवो
यद्वाचश्चितिमच्चकोरनिचये चाचण्डरोचीरुचः ।
यन्मेधासलिलेऽखिलेन युगपल्लोकेन मीनायितं
स श्रीमन् ! भगवन् ! सदा विजयसे त्रैलोक्यचिन्तामणे ! ॥
त्वां स्तुमोऽभिनमामस्त्वां त्वामेवोपास्महे सदा ।
त्वां प्रपद्यामहे नाथ ! निदेशय करोमि किम् ? १२३
यद्यस्ति कोऽपि निष्कर्मा सर्वज्ञो यदि कश्चन ।

मोक्षमार्गप्रकाशी चेत् त्वमेव परमेश्वर ! ॥१२४॥
सर्वविन्मूलकत्वेन विरोधानवकाशतः ।
सुधीपरिगृहीतेश्च प्रमाणं नस्त्वदागमः ॥१२५॥
दुर्जनेऽपि नृशंसेऽपि त्वद्दासम्मन्यता मयि ।
परिस्फुरति चेन्नाथ ! तदा खल्वस्मि निर्भयः ॥१२६॥
नरेन्द्रश्रीः सुरेन्द्रश्रीर्मुक्तिश्रीश्चेद् भविष्यति ।
त्वत्सेवयैव दासस्य शङ्का नात्रावकाशते ॥१२७॥
निदाने प्रतिषिद्धेऽपि भगवन् ! तव शासने ।
भवे भवेऽस्तु त्वत्पादसेवेत्येतन्निदान्यते ॥ १२८ ॥
कृताञ्जलि नमस्कृत्यान्तिमं विज्ञपयाम्यदः ।
मराल सततं स्वामिन् ! मम मानसमानसे ॥१२९॥
इत्येवमानयत पार्श्वपरेशितारं
सम्मेतशैलतिलकं स्तवनैकपद्याम् ।
श्रीमान् महेन्द्रविजयो मुनिरार्हताग्र्यः
सान्द्रोल्लसत्पुलककञ्चुकिताङ्गभागः ॥१३०॥
अग्रतस्तत आतेनुः प्रयाणं मुनयस्त्रयः ।
कलिकातां प्रति ज्ञानसम्पदं ददतोऽन्वहम् ॥१३१॥
मासमेकं विहारेण काशीतः कलिकातिकाम् ।
पौषशुक्लतृतीयायां प्राविक्षन्नष्टवादने ॥ १३२ ॥
योगश्रिया चाद्भुतया महेश्वरी-
भूतस्य तीर्थस्य च जङ्गमात्मनः ।
जनान् समस्तान् पुनतः प्रसन्नया

दृशा च संतोषसुधाकिरा गिरा ॥ १३३ ॥

अभीष्टकल्पद्रुमपादपङ्कज-
स्पर्शस्य चिन्तां व्रत ईक्षयैव च ।
मूर्तस्य वा पुण्यसमुच्चयस्य च
प्रातः प्रणम्यस्य सदा कृताञ्जलि ॥ १३४ ॥

श्रीमन्महेन्द्रस्य महेश्वरस्य
सान्निध्यतोऽमू श्रमणौ व्यधाताम् ।
असम्भवद्विघ्नकथौ विहारे
सम्यक् परीक्षादिकमिष्टकार्यम् ॥ १३५ ॥

अचिन्तितं न्यायविशारदेति
सत्काररूपं समवापतां च ।
बङ्गवर्गात् कलिकातिकायां
चिन्तामणौ सन्निहिते कथा का ? ॥ १३६ ॥

(चतुर्भिः कुलकम्)

मासत्रयं तत्र कृतस्थितिः सा
मुनित्रयी श्रीगुरुदर्शनेच्छुः ।
ततो विहारं कृतवत्यमन्दं
काशीपुरीमागमदेकमासम् ॥ १३७ ॥

श्रमापनोदाय च तत्र कञ्चित्
कालं त्रयस्ते श्रमणा अतिष्ठन् ।
ग्रीष्मर्तुतापाभिविवृद्धिभीत्या
ततो व्यहार्षुस्त्वरया पुनस्ते ॥ १३८ ॥

प्रापत् पथेऽथ ह्ययत्रर्षजन्मना-
ऽऽविर्भूतया कुक्षिविपीडयाऽसकृत् ।
विपीड्यमानोऽपि महेन्द्रपण्डितो
महामनाः कर्णपुरं कथञ्चन ॥ १३९ ॥
कालज्वरे तत्र समागतेऽथ
महानुभावः स महेन्द्रसाधुः ।
दिनान्यहो पञ्चदश ज्वरार्तिं
भुक्त्वा प्रयाणं व्यदधात् परत्र ॥ १४० ॥
क्षणं दृष्टो महेन्द्रोऽयं न जाने क्व क्षणं गतः ।
क्षणं दृष्टं क्षणं नष्टं संसारे सर्वमेव ही ! ॥ १४१ ॥
प्रेमाणं कुर्महे कुत्र विद्वेषं कुर्महे क्व वा ? ।
भस्मावशेषीभावश्चेत् सर्वस्यापि विजृम्भते ॥१४२॥
अतिप्रेमावगाढोऽपि परासुं प्रति किं सृजेत् ? ।
तावदेव हि सम्बन्धः प्राणा यावच्चकासति ॥१४३॥
एकत्र कुट्यां मिलिता रात्रौ पान्थाः, प्रगे पुनः ।
स्वस्वमार्गेण गच्छन्ति भवरूपं तथैव हि ॥१४४॥
वृथैव मूढा विषये प्रतिक्षणविभङ्गुरे ।
रज्यन्ति भवनैर्गुण्यमीक्षमाणा अपि स्फुटम् ॥१४५॥
अवश्यमेते यातारो विषया नो तथाप्यमून् ।
जहाति जहतोऽप्येष कीदृशी निर्विवेकता ? ॥१४६॥
स्वयमेव परित्यक्ता विषयाः शिवशर्मदाः ।
स्वातन्त्र्येण व्रजन्तस्तु दातारो दुःखमुच्चकैः ॥ १४७॥

एको धनी दरिद्रोऽन्यो विद्वानेको जडोऽपरः ।
स्वाम्येकः सेवकोऽन्यश्च कश्चित्क्षुत्क्षामकुक्षिकः ॥१४८॥
इत्येवं तद्विजातीयमन्योन्यं भवकानने ।
पश्यन्तोऽपि न तद्धेतुं लोका लोकामहे जडाः ॥१४९॥
शुभकर्मवशं सौख्यं विपरीताद् विपर्ययम् ।
अस्माभिः सम्यगालोच्याभ्युपेयं तदिदं ध्रुवम् ॥१५०॥
तन्निरुध्य द्विधा कर्म पूर्वकर्म निहत्य च ।
शेरते सुखमद्वैतं धन्या योगप्रभावतः ॥१५१॥
अष्टषष्ठ्यधिके चैकोनविंशतिशताब्दके ।
द्वादश्यां प्रथमाषाढधवलायां तिथौ पुनः ॥१५२॥
प्रगेऽष्टवादनाकाले श्रीमहेन्द्रमुनीशितुः ।
शोभनं ध्यायतः पञ्चपरमेष्ठिनमस्क्रियाम् ॥१५३॥
पञ्चविंशतिवर्षायुः समापितवतः पुनः ।
वेगात् प्रास्थिषत प्राणा लोचनाम्भोरुहाध्वना ॥१५४॥
( त्रिभिर्विशेषकम् )

पुरेऽत्र च श्राद्धगणैः सुभक्तितः
महोत्सवात् खिन्नमनस्कमादृतात् ।
स्मशानभूमावुपनीय तद्वपुः
सुसंस्कृतं केवलचन्दनाग्निना ॥ १५५ ॥
समाद्रियेते स्म च देववन्दनं
श्रीमङ्गल-न्यायमुनी सखेदकम् ।
सरागचारित्ररमानुभाविनः

खिद्यन्त्यहो ! सद्विरहेऽपि साधवः ॥ १५६ ॥
ततो व्यतीत्य त्रिदिनीममू मुनी
मुक्त्वा पुरं कर्णपुरं समागतौ ।
आग्रापुरं श्रीगुरुदर्शनोद्भवा-
मोदौ पयोदर्तुमतिष्ठतामिह ॥ १५७ ॥
आशास्महेऽन्तःकरणेन निर्भरं
महानुभावः स मुनिर्महेश्वरः ।
अस्मत्परोक्षं परलोकमाश्रितः
प्रपद्यतां निर्मलसातसंततिम् ॥ १५८ ॥
अतः परं त्वन्मुखदर्शनं गतं
कथाप्रसङ्गस्य कथा तु का भवेत् ? ।
संबन्ध एवैत् किमनल्पमुच्यते
विभीषणा हन्त ! भवस्य पद्धतिः ॥ १५९ ॥
अभ्यर्थनां कुर्म इमां महेश्वर !
स्वशक्तिलब्धे परलोकवैभवे ।
आकण्ठमग्नोऽपि कृपां विधाय नः
कदाचनानेष्यसि वर्त्मनि स्मृतेः ॥ १६० ॥

कृतिरेषा शास्त्रविशारदजैनाचार्यश्रीविजयधर्मसूरीश्वर-
चरणकमलमधुकरायमाणमुनिशिशु-
न्यायविजयस्य ।

## अद्यावधि मुद्रिता ग्रन्थाः

१. प्रमाणनयतत्त्वालोकालङ्कारः—जैनन्यायदर्शनस्यापूर्वोऽयं प्रवेशग्रन्थः, कर्ता चास्य श्रीवादिदेवसूरिः। मूल्यम् ०-८-०
२. हैमलिङ्गानुशासनम्–अवचूरिसहितम्। लिङ्गबोधकोऽयं मनोहरो ग्रन्थः। कर्ताऽस्य श्रीहेमचन्द्राचार्यः। ,, ०-५-०
३. सिद्धहेमशब्दानुशासनम्–लघुवृत्तिधातुपाठादिसहितम्। कर्ताऽस्य श्रीहेमचन्द्राचार्यः। ,, ३-०-०
४. गुर्वावली (द्वितीयावृत्तिः) श्रीमुनिसुन्दरसूरिविरचिता ०-४-०
५. रत्नाकरावतारिकायाः टिप्पणपञ्जिकासहितायाः परिच्छेदद्वयम्–प्रमाणनयतत्त्वालोकालङ्कारस्य व्याख्यानरूपं रत्नप्रभाचार्यविरचितम्। ,, १-०-०
६. सिद्धहेमशब्दानुशासनम्–मूलमात्रम्। ,, ०-५-०
७ स्तोत्रसंग्रहस्य प्रथमोभागः। (द्वितीयावृत्तिः) ,, ०-६-०
८. मुद्रितकुमुदचन्द्रप्रकरणम्-श्रीश्रावकयशश्चन्द्रकृतम् ,, ०-८-०
९ स्तोत्रसंग्रहस्य द्वितीयो भागः। (द्वितीयावृत्तिः) ,, १-०-०
१०. क्रियारत्नसमुच्चयः–गुणरत्नसूरिरचितः। ,, २-०-०
११. श्रीसिद्धहेमशब्दानुशासनसूत्रपाठस्याकारादिक्रमेण सूचीपत्रम्। ,, ०-४-०
१२. कविकल्पद्रुमः। कर्ता चास्य श्रीहर्षकुलगणिः।,, ०-४-०
१३. सम्मतितर्काख्यप्रकरणस्य प्रथमो विभागः, श्रीसिद्धसेनदिवाकररचितः। श्रीराजगच्छीयाभयदेवसूरिरचितया तत्त्वबोधविधायिन्या व्याख्यया विभूषितः।,, २-०-०
१४. जगद्गुरुकाव्यम्-श्रीपद्मसागरगणिविरचितम् ,, ०-४-०
१५. श्रीशालिभद्रचरितम्–टिप्पणसहितं, श्रीधर्मकुमारसुधिया विरचितम्। अपूर्वोऽयं कथाग्रन्थः, (पत्राकारे),, १-४-०
१६. पर्वकथासंग्रहस्य प्रथमो विभागः, (पत्राकारे) ,, ०-४-०
१७. षड्दर्शनसमुच्चयः–श्रीराजशेखरसूरिविरचितः,, ०-४-०
१८. शीलदूतम्–श्रीचारित्रसुन्दरगणिविनिर्मितम्। ,, ०-४-०
१९. निर्भयभीमव्यायोगः–श्रीरामचन्द्रसूरिविरचितः,, ०-४-०

२०. श्रीशान्तिनाथमहाकाव्यम्–श्रीमुनिभद्रसूरिविरचितम्
,, ३

२१. रत्नाकरावतारिका– श्रीरत्नप्रभाचार्यकृता– तृतीय
च्छेदादारभ्याऽष्टमपरिच्छेदपर्यन्ता । ,, १-८-०

२२. ,, आद्यपरिच्छेदद्वयस्य । ,, १-०-०

,, प्रथमाद्यष्टमान्तस्य संपूर्णस्य । ,, ३-०-०

उपदेशतरङ्गिणी, (पत्राकारे) ,, ३-०-०

न्यायार्थमञ्जूषा स्वोपज्ञलघुन्याससहिता । ,, ३-०-०

२३. गुरुगुणरत्नाकरकाव्यम्–अस्मिन् लालित्यमये खण्डकाव्ये तपागच्छाचार्यश्रीलक्ष्मीसागरसूरीणां चरित्रमैतिहासिकदृष्ट्या सरसमुपवर्णितम् । कर्ताऽस्य श्रीसोमचारित्रगणिः । ,, ०-८-०

२४. विजयप्रशस्तिमहाकाव्यम्, सटीकम्–अस्मिन् महाकाव्ये श्रीहीरविजयसूरि–श्रीविजयसेनसूरि–श्रीविजयदेवसूरीणां चरित्राणि सम्यग् निर्वर्णितानि । निर्माताऽस्य कविपुरन्दरः श्रीहेमविजयगणिः । मूल्यम्–५-०-०

२६. गद्यपाण्डवचरित्रम्–श्रीदेवविजयगणिगुम्फितम् । एतच्च व्याख्यातॄणां विद्यार्थिनां च बहूपयोगि । ,, ४-०-०

२९. मल्लिनाथचरित्रम्–श्रीविनयचन्द्रसूरिरचितम् । एतच्चातीवसरलम्, व्याख्यातॄणां मुनीनामुपयोगार्थं पत्राकारेणापि मुद्रितम् । ,, ३-०-०

३०. स्याद्वादमञ्जरी–श्रीमल्लिषेणसूरिविरचिता । जैनन्यायग्रन्थोऽयं जैनन्यायमध्यमपरीक्षायां समस्ति, (पत्राकारे) १-०-०

३२. पार्श्वनाथचरितम्–कालिकाचार्यसंतानीयभावदेवसूरिविरचितम्. ( पत्राकारेऽपि ) ३-०-०

प्राप्तिस्थानम्–

शा. हर्षचन्द्र–भूराभाई.

अंग्रेजीकोठी बनारस सिटी ।